श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्त महा देसिकाय नमः

---

Please install **Sanskrit New font** to view this file in sanskrit script.

---

## न्यास तिलकम्

श्रीमान् वेङ्कट नाथार्यः कवितार्किक केसरी।
वेदान्ताचार्य वर्यो मे सन्निधत्तां सदा हृदि॥

गुरुभ्यस् तद् गुरुभ्यश्च नमो वाक मधीमहे।
वृणीमहे च तत्राद्यौ दंपति जगतां पति॥१

प्रायः प्रपदने पुंसां पौनः पुन्यं निवारयन्।
हस्तः श्री रङ्ग भर्तुर् माम् अव्याद् अभय मुद्रितः॥२

अनादेर् निस्सीम्नो दुरित जलधेर् यन्निरुपमं
विदुः प्रायश्चित्तं यदु रघु धुरीणाशय विदः।
तदारम्भे तस्या गिरम् अवदधानेन मनसा
प्रपद्ये तामेकाम् श्रियम् अखिल नाथस्य महिषीम्॥३

महेन्द्राा विष्णु प्रभृतिषु महत्त्व प्रभृतिवत्
प्रपत्तव्ये तत्त्वे परिणमित वैशिष्ट्य विभवाम्।
अधृष्यत्वम् धूत्वा कमितुर् अभिगम्यत्व जननीं
श्रियं शीता पाङ्गां अहम् अशरणो यामि शरणम्॥४

स्वतः सिद्ध श्रीमानमित गुण भूमा करुणया
विधाय ब्रह्मादीन् वितरति निजादेशमपि यः।



rmvenkat@yahoo.com

प्रपत्त्या साक्षाद् वा भजन शिरसा वाऽपि सुलभम्
मुमुक्षुर् देवेशं तमहम् अधि गच्छामि शरणम् ॥५

वृन्दानि य स्वः वशयन् व्रज सुन्दरीणाम्
बृन्दा वनान्तर भुवां सुलभो बभूवः ।
श्रीमान् अशेष जन सङ्ग्रहणाय शेते
रङ्गे भुजङ्ग शयने स महा भुजङ्गः ॥६

रङ्गास्तीर्ण भुजङ्ग पुङ्गव वपुः पर्यङ्क वर्यं गतौ
सर्ग स्थिति अवसान केलि रसिकौ तौ दम्पती नः पती ।
नाभी पङ्कज शायिनः श्रुति सुखैर् अन्योन्य बद्धस्मितौ
डिम्भस्याबुज संभवस्य वचनैर् ओं तत सद् इत्यादिभिः ॥७

घन करुणा रसौघ भरितां परिताप हरां
नयन महश्छटां मयि तरङ्गय रङ्ग पते ।
दुरित हुताशन स्फुरित दुर्दम दुःख मषी-
मलिनित विश्व सौध दुर पह्नव वर्ण सुधाम् ॥८

दुर्मोच उद्भट कर्म कोटि निबिडोऽपि आदेश वश्यः कृतो
बाह्यैर् नैव विमोहितोऽस्मि कुदृशां पक्षैर् न विक्षोभितः ।
यो माहानसिको महान् यतिपतेर्नीतश्च तत् पौत्रजान्
आचार्या निति रङ्ग धुर्य मयि ते स्वल्प अवशिष्टो भरः ॥९

आर्तेष्वाशु फला तदन्य विषयेऽपि उच्छिन्न देहान्तरा
वह्न्यादेर् अनपेक्षणात् तनुभृतां सत्यादिवद् व्यापिनी ।
श्रीरङ्गेश्वर यावदात्म नियत त्वत पारतन्त्र योचिता ॥
त्वय्येव त्वदुपाय धीर् अपिहित स्वोपाय भावाऽस्तु मे ॥१०

त्वय्याचार्यैः विनिहित भरास्तावका रङ्गनाथ
त्वत् कैङ्कर्य प्रवण मनसः त्वत् गुणास्वाद मत्ताः।
त्वय्येकस्मिन्नपि विजहतो मुक्तवत् साधनत्वं
त्वच्छेषत्व स्वरस रसिकाः सूरयो मे स्वदन्ताम्॥११

कल्प स्तोमेऽप्यपास्त त्वदितर गतयो अशक्ति धी भक्ति भूम्ना
रङ्गेश प्रातिकूल्य क्षरण परिणमन् निर्विघात अनुकूल्याः।
त्रातारं त्वामभेद्याच्छ्रण वरणतो नाथ निर्विघ्नयन्तः
त्वन् निक्षिप्तात्म रक्षां प्रति रभस जुषः स्व प्रवृत्तिम् त्यजन्ति॥१२

त्यक्तोपाय व्यपायान् तदुभय करणे सत्रपान् सानुतापान्
भूयोऽपित्तत् प्रपत् या प्रशमित कलुषान् हन्त सर्वं सहस्त्वम्
रङ्गिन् न्यासान्तरङ्ग अखिल जन हितता गोचर त्वन्निदेश-
प्रीति प्राप्त स्व वर्णाश्रम शुभ चरितान् पासि धन्यान् अनन्यान्॥१३

शोकास्पदांश मथनः श्रयतां भवाब्धौ
रागास्पदांश सहजं न रुणत्सि दुःखम्।
नो चेदमी जगति रङ्ग धुरीण भूयः
क्षोदिष्ठ भोग रसिकास्तव न स्मरेयुः॥१४

हेतुर् वैधे विमर्शे भजनवद् इतरत् किं त्वनुष्टान काले
वेद्य त्वद्रूप भेदो विविध इह स तु उपायता अन्य अनपेक्षा।
रङ्गिन प्राब्ध भङ्गात् फलमधिकं अनावृत्तिर् उक्तेष्टिवत् स्यात्
नाना शब्दादि भेदात् प्रपदन भजने सूचिते सूत्र कारैः॥१५

भक्तौ रङ्ग पते यथा खलु पशुच्छागादिवत् वेदन-
ध्यानोपासन दर्शनादि वचसाम् इच्छन्ति अभिन्न अर्थताम्।
व्यक्ति ऐक्यात् छ्रणागति प्रपदन त्यागात्म निक्षेपण-

न्यासाद्येषु तथैव तन्त्र निपुणैः पर्यायता स्मर्यते ॥१६

विश्वासायास भूम्ना न्यस्त भजनयोर् गौरवे को विशेषः
तत्सद्भावेऽपि धर्मान्तर इव घटते कर्तृ भेदाद् विकल्पः ।
तद्भेदो रङ्गशायिन् अनितर गतिताद्युत्थ शोकातिरेकात्
सद्विद्यादौ विकल्पस्त्वभिमति भिदया तेन तत्र ऐकराश्यम् ॥१७

ध्रुवमधि कृति भेदाद् कर्मवत् रङ्ग शायिन्
फलति फलमनेकं त्वत्पदे भक्ति रेका ।
शरण वरण वाणी सर्व हेतुस् तथाऽसौ
कृपण भजन निष्ठा बुद्धि धौर्बल्य काष्ठा ॥१८

कर्तव्यं सकृदेव हन्त कलुषं सर्वं ततो नश्यति
ब्रह्मेशादि सुदुर्लभं पदमपि प्राप्यं मया द्रागिति ।
विश्वास प्रतिबन्धि चिन्तमिदं पर्यस्यति न्यस्यतां
रङ्गाधीश रमापतित्व सुभगं नारायण त्वं तव ॥१९

धी कर्म भक्ति रहितस्य कदाऽप्यशक्त्या
रङ्गेश भाव कलुष प्रणति द्वयोक्तेः ।
मन्ये बलं प्रबल दुष्कृत शालिनो मे
तन्मूल देशिक कटाक्ष निपातम् आद्यम् ॥२०

अन्धोऽनन्ध ग्रहण वशगो याति रङ्गेश यद्वत्
पङ्गुर्नौका कुहर निहितो नीयते नाविकेन ।
भुङ्क्ते भोगान् अविदित नृपः सेवकस्य अर्भकादिः
त्वत् संप्राप्तौ प्रभवति तथा देशिको मे दयालुः ॥२१

उक्त्वा धनञ्जय विभीषण लक्ष्यया ते

प्रत्याय्य लक्ष्मण मुनेर्भवता वितीर्णम्।
श्रुत्वा वरं तदनुबन्ध मदा वलिप्ते
नित्यं प्रसीद भगवन् मयि रङ्गनाथ ॥२२

सकृदपि विनतानां सर्वदे सर्व देहिनि
उपनिषद् अभिधेये भागधेये विधेये।
विरमति न कदाचिन् मोहतो हा हतोऽहं
विषम विषय चिन्ता मेदुरा मे दुराशा ॥२३

यावज्जीवं जगति नियता देह यात्रा भवित्री
त्यक्ताः सर्वे त्रिचतुर दिन ग्लान भोगा न भोगाः।
दत्ते रङ्गी निजमपि पदं देशिकादेश काङ्क्षी
किं ते चिन्ते परमभिमतं खिद्यसे यत् पुनस्त्वम् ॥२४

अपि मुहुरपराधैर् अप्रकम्प्य अनुकम्पे
वहति महति योग क्षेम बृन्दं मुकुन्दे।
मद कलुष मनीषा वज्रलेप अवलेपान्
अनुगुणयितुम् ईहे न प्रभून् अप्रभूतान् ॥२५

मातर् भारति मुञ्च मानुष चटून् हे देह लब्धैलम्
लुब्ध द्वार दुरासिका परिभवैः तोषं जुषेथा मनः।
वाचः सीमनि रङ्ग धामनि महानन्द उन्नमद् भूमनि
स्वामिनि आत्मनि वेङ्कटेश्वर कवेः स्वेन अर्पितोऽयं भरः ॥२६

दास्यं लास्यवताऽनुमत्य मनसा रङ्गेश्वर त्वत्पदे
नित्यं किं कर वाण्यहं न तु पुनः कुर्यां कदर्याश्रयाम्।
मीलच्चक्षुषि वेल्लित भ्रुणि मुहुर् दत्ताव मानाक्षरे
भीमे कस्यचिद आढ्यकस्य वदने भिक्षा विलक्षां दशाम्॥ २७

त्वय्ये काञ्चलि किङ्करे तनुभृतां निर्व्याज सर्वं सहे
कल्याणात्मनि रङ्ग नाथ कमला कान्ते मुकुन्दे स्थिते ।
स्वामिन् पाहि दयस्व देव कुशलिन् जीव प्रभो भावयेति
आलापान् अवलेपिषु प्रलपितुं जिह्वेति जिह्वा मम ॥२८

त्वयि सति रङ्ग धुर्य शरणागत कामदुघे
निरुपधिक प्रवाह करुणा परिणाहवति ।
परिमित देश काल फलदान् फलदाकृकान्
कथमधि कुर्महे विधि शिव प्रमुखान मुखान् ॥२९

ओमिति अभ्युपगम्य रङ्ग नृपते अनन्योचिताम् शेषतां
स्वातन्त्र्यादिमयीम् अपोह्य महतीं अद्यां अविद्यास्थितिम् ।
नित्या सङ्ख्य विसीम भूति गुणयोर् यायाम् अनायासतः
सेवा संपदम् इन्दिरेश युवरोर् ऐकान्तिक आत्यन्तिकीम् ॥३०

आचार्यात् रङ्ग धुर्य द्वय समधिगमे लब्ध सत्तम् तदात्वे
विश्लिष्टाश्लिष्ट पूर्वोत्तर दुरित भरं यापित आरब्ध देहम् ।
नीतं त्वत्कैस्त्वया वा निरवधिक दयोद्भूत बोधादि रूपम्
त्वद्भोगैक स्वभोगं दयितमनुचरं त्वत्कृते मां कुरुष्व ॥३१

विधानां रङ्गेशाद् अधिगतवतो वेङ्कट कवेः
स्फुरद् वर्णं वक्रे परि कलयतां न्यास तिलकम् ।
इहामुत्राप्येष प्रणत जन चिन्तामणि गिरिः
स्व पर्यङ्के सेवां दिशति फणि पर्यङ्क रसिकः ॥३२

कवितार्किक सिंहाय कल्याण गुण शालिने ।
श्रीमते वेङ्कटेशाय वेदान्त गुरवे नमः ॥

---

Please send your comments and suggestions to R.Venkat



rmvenkat@yahoo.com